# द्वितीयः पाठः

# नारी–महिमा

**डॉ. सतीश कपूरः**

**परिचयः –**

श्रद्धाऽनुविद्धेन हृदयेन अनुशीलनीयायाम् अस्माकं भारतीयसंस्कृतौ नारीणां किं स्थानं विद्यते इति जिज्ञासां शमयितुम् एकमेव पद्यमिदं सुपर्याप्तं भवति यत्–

**'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।'**

**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राऽफलाः क्रियाः।। इति।।**

प्रस्तुतः पाठोऽयं 'नारी–महिमा' इति नाममात्रेण एवं स्वपरिचयं सुतरां प्रकटयति। अस्मिन् पाठे नारीणां गुणगौरवं स्थितिदर्शनं च परिलक्षितम् अस्ति। नारीं प्रति मनुष्याणां दृष्टिकोणस्य सार्थक्यं चापि अत्र निदर्शितं विद्यते।

आशुकविः डॉ. सतीश कपूरः अस्य पाठस्य रचयिता वर्तते। हरियाणाप्रान्तस्य अम्बालयनगरे लब्धजन्मा कविरेषः व्याकरणशास्त्रे साहित्यशास्त्रे च अधीती वर्तते। सकलभुवनभास्करं भगवन्तं सूर्यदेवं महागुरुरूपेण समाराधयितुं प्रतिदिनम् एकमभिनवं पद्यं विरचय्य पद्यप्रसूनाञ्जलिरूपाणि भुवनभास्करस्तवात्मकानि षोडश शतकानि समर्पितानि कविनाऽनेन। अभिनवमौक्तिकशतकम् इति मुक्तककाव्यमपि विरचितमनेन। इतोऽतिरिच्य कविनानेन संस्कृते हिन्द्याम् आङ्ग्लभाषायां च अनेकानि गीतानि कविता लघुरूपकाणि चापि विरचितानि। विविधरागेषु नवीनस्वररचना संस्कृतबन्धश्च, संस्कृतच्छन्दोऽनुगुणं नवतालप्रयोगः विविधच्छन्दसां नवप्रयोगश्चापि कवेरस्य वैशिष्ट्यम्।

राजस्थान–संस्कृत–अकादमी, जयपुरद्वारा संस्कृतप्रतिभासम्मानेन श्रेष्ठसंस्कृतशिक्षक सम्मानेन च कविरेष सभाजितः। जयपुरस्थिते श्री–दिगम्बर–जैन–आचार्य–संस्कृत– महाविद्यालये त्रयोदशवर्षाणि व्याख्यातृपदमधिष्ठाय साम्प्रतमेषः सप्तभ्यो वर्षेभ्यो राष्ट्रियसंस्कृतसंस्थान– मानितविश्वविद्यालयस्य जम्मूनगरस्थिते श्रीरणवीरपरिसरे साहित्यविभागाध्यक्षपदमधितिष्ठति।

## नारी–महिमा

**जन्मप्रदेति जननी जनितेति पुत्री,**
**नारी तथैव भगिनी च सहोदरत्वात्।**
**अर्धाङ्गिनी घनघटा प्रणयाऽमृतानाम्,**
**नारीं विना तु विफलश्रमवान् विधाता।। 1।।**

**पदच्छेदः –** जन्मप्रदा इति जननी जनिता इति पुत्री नारी तथा एवं भगिनी च सहोदरत्वात्। अर्धाङ्गिनी घनघटा प्रणय + अमृतानाम् नारीम् विना तु विफलश्रमवान् विधाता।

**अन्वयः** – नारी जन्मप्रदा इति जननी, जनिता इति पुत्री तथा एव च सहोदरत्वात् भगिनी, प्रणयामृतानाम् घनघटा (रूपेण) अर्धाङ्गिनी (भवति) नारीं विना तु विधाता अपि विफलश्रमवान् (भवेत्)।

**व्याख्या –** नारी – स्त्री, योषित्। जन्मप्रदा – जन्मप्रदात्री। इति–इति कारणात्। जननी–माता। जनिता – उत्पादिता। इति – अस्मात् कारणात्। पुत्री–तनया, सुता। तथा एव च – तेनैव प्रकारेण, तद्वत् वा। सहोदरत्वात – समानोदरजन्मकारणात्। भगिनी – स्वसा। प्रणयामृतानाम् – प्रेमरूप–सुधानाम्। घनघटा – मेघघटा (रूपेण) अर्धाङ्गिनी – जाया भार्या वा (भवति)। नारीम् विना – स्त्रियम् अन्तरेण। तु – तावत्। विधाता–ब्रह्मा, स्रष्टा (अपि)। विफलश्रमवान् – निष्फलप्रयत्नः (भवेत्)।

**भावार्थः –** नार्याः विविधरूपाणि वर्णयति कविः – नारी जन्मदायिनी भवति अतः जननी उच्यते, सा उत्पादिता तस्मात् पुत्री इति ज्ञायते। तेनैव प्रकारेण समानोदरत्वात् सहोदरी प्रेम्णः घनघटारूपेण अर्धाङ्गिनी कथ्यते। नारीं विना तु ब्रह्मा अपि सृष्टिं कर्तुं न समर्थः इत्याशयः।

**व्याकरणम् –** जन्मप्रदेति–जन्मप्रदा + इति, स्वरसन्धिः, गुणः। तथैव – तथा + एव, स्वरसन्धिः, वृद्धिः। अर्धाङ्गिनी – अर्ध + अङ्गिनी, स्वरसन्धिः, गुणः।

प्रणायामृतानाम् – प्रणयः एव अमृतम् इति तेषाम् (अवधारणार्थे कर्मधारय) विफलश्रमवान् – विगतं फलं यस्मात् तत् विफलम्, विफलः श्रमः यस्य सः (बहुव्रीहिः)। तस्मिन्नेव अर्थे मतुप्। घनघटा – घनानां घटा (षष्ठी तत्पुरुषः)।

विधाता – वि+धा+तृच्। नारी – नर+ङीप् ।

जनिता – जन् + णिच् + क्त +टाप्। प्रणयः – प्र+नी+अच्।

**बाल्येऽमृतानि ददती करुणार्द्रचित्ता,**
**कर्त्तव्यमार्गमुचितानुचितं दिशन्ती।**
**स्निग्धाशिषैव दुरितानि निवारयन्ती,**
**उत्साहपुण्यतटिनी खलु मातृशक्तिः।। 2।।**

**पदच्छेदः –** बाल्ये अमृतानि ददती करुणार्द्रचित्ता कर्त्तव्यमार्गम् उचित + अनुचितम् दिशन्ती। स्निग्ध–आशिषा एव दुरितानि निवारयन्ती उत्साहपुण्यतटिनी खलु मातृशक्तिः।

**अन्वयः –** करुणार्द्रचित्ता बाल्ये अमृतानि ददती, उचितानुचितं कर्त्तव्यमार्गं दिशन्ती, स्निग्धाशिषा एव दुरितानि निवारयन्ती मातृशक्तिः खलु उत्साहपुण्यतटिनी (वर्तते)।

**व्याख्या** – करुणार्द्रचित्ता–करुणापूर्णहृदया, वात्सल्यप्लाविताऽन्तःकरणा इत्याशयः।

बाल्ये–शैशवावस्थायाम्। अमृतानि–सुधातुल्यपदार्थान्, अमृतपदेन दुग्धं, पुष्टिकराणि खाद्यवस्तूनि च लक्षितानि। ददती–प्रयच्छन्ती। उचितानुचितम् – शोभनाशोभनम्, करणीयाकरणीयम्। कर्तव्यमार्गम्–कर्तव्योपदेशम्, कर्ममार्गम्, आचरणपद्धतिम्।

दिशन्ती – बोधयन्ती। स्निग्धाशिषा – स्नेहपूर्णाशीर्वादेन। एव – अवधारणार्थे। दुरितानि–अनिष्टानि, अमङ्गलानि। निवारयन्ती–दूरीकुर्वती। मातृशक्तिः – मातृरूपाशक्तिः, जननीमहिमा। खलु–निश्चयेन। उत्साहपुण्यतटिनी–उत्साहरूपा पुण्यरूपा च नदी वर्तते।

**भावार्थः** – मातृशक्तेः गरिमाणं वर्णयन् कविः कथयति यत् करुणापूर्णहृदया मातृशक्तिः बाल्यकाले दुग्धादिपुष्टिकरान् अमृततुल्यपदार्थान् ददाति। करणीयाकरणीयस्य मार्गम् उपदिशति। मातुः स्नेहपूर्णाशीर्वादेन एव सन्ततेः अमङ्गलं विनश्यति। माता निश्चयेन उत्साहरूपा पुण्यरूपा च नदी वर्तते, सा ईदृशी नदी यस्याः एकतः उत्साहरूपं तटम् अपरतः च पुण्यरूपं तटं भवति। रूपकम्–अलङ्कारः।

**व्याकरणम्** – आशिषैव – आशिषा + एव, स्वरसन्धिः, वृद्धिः। बाल्येऽमृतानि बाल्ये+अमृतानि, स्वरसन्धिः, पूर्वरूपम्। करुणार्द्रचित्ता–करुण + आर्द्रचित्ता, स्वरसन्धिः, सवर्णदीर्घः। स्निग्धाशिषा–स्निग्ध + आशिषा, स्वरसन्धिः, सवर्णदीर्घः।

स्निग्धाशिषा – स्निग्धा च असौ आशीः, तया कर्मधारयः। कर्तव्यमार्गम् – कर्तव्यस्य मार्गः, तम् (षष्ठीतत्पुरुषः)। उचितानुचितम् – उचितं च अनुचितं च तयोः समाहारः (द्वन्द्वः)। करुणार्द्रचित्ता – आर्द्रचित्तं यस्याः सा आर्द्रचित्ता (बहुव्रीहिः), करुणया आर्द्रचित्ता इति (तृतीयातत्पुरुषः) ददती–दा + शतृ + ङीप्। कर्तव्यः – कृ + तव्यत्। तटिनी – तट+इनि+ङीप्। स्निग्धा – स्निह् + क्त + टाप्।

**श्रान्तोऽसि तात ! विनिधेहि शिरो मदङ्गे,**
**इत्याग्रहेण मृदुलं मृदुलं स्पृशन्त्याः।**
**पुण्यैर्विमुग्धमुखदुग्धरदाङ्कुरायाः**
**धन्या हि मातुरिव ते पितरः सुतायाः।। 3 ।।**

**पदच्छेदः** – श्रान्तः असि तात ! विनिधेहि शिरः मदङ्गे इति आग्रहेण मृदुलम् मृदुलम् स्पृशन्त्याः। पुण्यैः विमुग्ध–मुख–दुग्ध–रद–अङ्कुरायाः, धन्याः हि मातुः इव ते पितरः सुतायाः।

**अन्वयः –** तात ! श्रान्तः असि, शिरः मदङ्गे विनिधेहि, इति आग्रहेण मृदुलं स्पृशन्त्याः पुण्यैः विमुग्धमुखदुग्धरदाङ्कुरायाः मातु इव सुतायाः पितरः ते हि धन्याः (सन्ति)।

**व्याख्या** – तात ! पितः। श्रान्तः असि – श्रमेण क्लान्तः असि। शिरः शीर्षम्, मस्तकम्। मदङ्के–मम क्रोडे। विनिधेहि – स्थापय। इति–इत्थम्, आग्रहेण, साग्रहम्, अनुरोधपूर्वकम्, मृदुलं मृदुलम् – कोमलतापूर्वकम्। स्पृशन्त्याः स्पर्शं कुर्वत्याः। पुण्यैः सुकृतैः। विमुग्धमुखदुग्धरदाङ्कुरायाः – विमुग्धं नाम निर्दोषरमणीयम्, दुग्धरदाः नाम दुग्धदन्ताः, निर्दोषसुन्दराननदुग्धदन्तकलिकायाः इत्यर्थः। मातुः इव – जनन्याः इव। सुतायाः – तनयायाः। पितरः – जनकाः। ते–तादृशाः जनाः। हि – निश्चयेन। धन्याः सौभाग्यशालिनः सन्ति।

**भावार्थः** – सुतायाः प्रकृतिं वर्णयन् तस्याः जन्म पितुः सौभाग्यमित्याह – श्रमेण क्लान्तं पितरं पुत्री कथयति–हे तात ! भवान् मम क्रोडे शिरः स्थापयतु, ततः सा कोमलतापूर्वकं शिरः स्पृशति। एषा बाला

निर्दोषसुन्दरमुखे दुग्धदन्तकलिकायुक्ता अस्ति अर्थात् तस्याः मुखे दुग्धदन्ताः शोभन्ते। बालिका अपि मातृतुल्यगरिमाणं प्रदर्शयति। तासां पितरः सौभाग्यशालिनः भवन्ति।

**व्याकरणम् –** श्रान्तोऽसि – श्रान्तः + असि, विसर्गसन्धिः, रुत्व–उत्व–पूर्वरूपम्। इत्याग्रहेण–इति + आग्रहेण, स्वरसन्धिः, यण्। मातुरिव–मातुः इव, विसर्गसन्धिः, रुत्वम्। शिरो मदङ्के–शिरः+मदङ्के, विसर्गः, रुत्व–उत्व–गुणः।

विमुग्धमुखदुग्धरदाङ्कुरायाः – विमुग्धे मुखे दुग्धरदानाम् अङ्कुराः यस्याः सा तस्याः (बहुव्रीहिः)। मदङ्के–मम अङ्के तस्मिन् (षष्ठीतत्पुरुषः)।

श्रान्तः–श्रम–क्त। विमुग्धः – वि + मुह् + क्त। दुग्ध – दुह् – क्त।

**रक्षानिबन्धनपवित्रचरित्रदृष्टिम्,**
**सङ्कल्पशक्तिमतुलां हृदये सृजन्ती।**
**नारी जनस्य सुकृतैर्भगिनी भवन्ती,**
**भ्रातेति मर्मगरिमाणमभिव्यनक्ति।। 4 ।।**

**पदच्छेदः** – रक्षानिबन्धन पवित्र चरित्र दृष्टिम्, सङ्कल्पशक्तिम् अतुलाम् हृदये सृजन्ती। नारी जनस्य सुकृतैः भगिनी भवन्ती, भ्राता इति मर्म–गरिमाणम् अभिव्यनक्ति।

**अन्वयः –** जनस्य हृदये रक्षानिबन्धनपवित्रचरित्रदृष्टिम् अतुलां संङ्कल्पशक्तिं सृजन्ती (जनस्य) सुकृतैः भगिनी भवन्ती नारी "भ्राता" इति मर्म–गरिमाणम् अभिव्यनक्ति।

**व्याख्या** – जनस्य = मनुष्यस्य। हृदये = मनसि, अन्तःकरणे। रक्षानिबन्धनपवित्रचरित्रदृष्टिम् – रक्षासूत्रबन्धनेन पावनचरित्रदृष्टिम्। अतुलाम् = अनुपमाम्। सङ्कल्पशक्तिम् = निष्ठाबलम्, आत्मशक्तिम्। सृजन्ती = उत्पादयन्ती। जनस्य = मानवस्य। सुकृतैः = पुण्यैः। भगिनी = सहोदरी, स्वसा। भवन्ती = जायमाना। नारी = स्त्री। 'भ्राता' इति = सहोदर इति शब्दस्य। मर्म = गरिमाणम्, गूढरहस्यगौरवम्। अभिव्यनक्ति = प्रकटयति।

**भावार्थः** – सम्प्रति भगिनीचरितस्य महिमानम् आह – भगिन्या बद्धे रक्षासूत्रे महान्तः पुण्यभावाः निवसन्ति, तेन रक्षासूत्रबन्धनेन सा नारी मानवस्य हृदये पावनचरित्रदृष्टिम् अतुलनीयां निष्ठाशक्तिं च उत्पादयति। मानवस्य पुण्यैः एव सा भगिनीरूपे आयाति। 'भ्राता' इति पदस्य महत्त्वं बोधयितुं भगिनी एव प्रेरयति।

**व्याकरणम् –** भ्रातेति – भ्राता + इति, स्वरसन्धिः, गुणः। सुकृतैर्भगिनी–सुकृतैः + भगिनी, विसर्गसन्धिः, रुत्वम्। मर्मगरिमाणम् – मर्मणः गरिमा तम् (षष्ठीतत्पुरुषः)। रक्षानिबन्धनपवित्र – चरित्रदृष्टिम् – पवित्रं च तत् चरित्रम्, पवित्रचरित्रम्, तस्य दृष्टिः पवित्रचरित्रदृष्टिः रक्षायाः निबन्धनम् रक्षानिबन्धनम्, रक्षानिबन्धनेन पवित्रचरित्रदृष्टिः ताम् (तत्पुरुषः)। सङ्कल्पशक्तिम् – सङ्कल्पस्य शक्तिः ताम् (षष्ठीतत्पुरुषः)। गरिमाणम् – गुरु + इमनिच् द्वितीया एकवचनम्। सृजन्ती – सृज् + शतृ + ङीप्। चरित्रम् – चर् + इत्र।

**मोहान्धयौवनवने प्रणयावलोकैः,**
**हस्तेन हस्तमुपयम्य दिशं दिशन्ती।**

**वंशं समुज्ज्वलयते सदपत्यरत्नैः,**

**सौभाग्यसिन्धुसरिता जगतीह नारी।। 5 ।।**

**पदच्छेदः** – मोहान्धयौवनवने प्रणय अवलोकैः हस्तेन हस्तम् उपयम्य दिशम् दिशन्ती। वंशम् समुज्ज्वलयते सत् अपत्यरत्नैः सौभाग्य–सिन्धु–सरिता जगति इह नारी।

**अन्वयः –** मोहान्धयौवनवने प्रणयावलोकैः हस्तेन हस्तम् उपयम्य दिशं दिशन्ती, सदपत्यरत्नैः, वंशं समुज्ज्वलयते। नारी इह जगति सौभाग्यसिन्धुसरिता (वर्तते)।

**व्याख्या** – मोहान्धयौवनवने – मोहग्रस्तयुवावस्थारूपे कानने। प्रणयावलोकैः – प्रेमरूपप्रकाशैः। हस्तेन – करेण। हस्तम् – करं, पाणिम्। उपयम्य – गृहीत्वा। दिशम् – दिशानिर्देशम्। दिशन्ती – उपदेशं कुर्वती। सदपत्यरत्नैः – श्रेष्ठसन्ततिरूपमणिभिः। वंशम् – कुलम् (अन्वयम्)। समुज्ज्वलयते – उज्ज्वलं करोति, गौरवान्वितं करोति। नारी–स्त्री। इह–अत्र। जगति–संसारे। सौभाग्य–सिन्धुसरिता–पुण्यसागरगामिनी नदी। वर्तते इति शेषः।

**भावार्थः** – मायाजालपरिपूर्णे यौवनरूपे वने प्रणयरूपप्रकाशैः करेण करं गृहीत्वा कर्तव्यविषयं बोधयन्ती सा नारी पत्नीरूपेण श्रेष्ठ–सन्तानरूपरत्नैः कुलं गौरवान्वितं करोति। नारी पत्नीरूपेण तादृशी नदी विद्यते या खलु सौभाग्यसमुद्रं प्रति नयति।

**व्याकरणम् –** जगतीह – जगति+इह, स्वरसन्धिः, सवर्णदीर्घः। मोहान्धम् – मोह + अन्धम्, स्वरसन्धिः, सवर्णदीर्घः। सदपत्यरत्नैः – सत् + अपत्यरत्नैः, व्यञ्जनसन्धिः, जश्त्वम्। समुज्ज्वलयते – सम् + उद् + ज्वलयते, व्यञ्जनसंधिः, श्चुत्वम्।

मोहान्धयौवनने –मोहेन अन्धम्, मोहान्धम् च तद् यौवनम् मोहान्धयौवनम्, मोहान्धयौवनम् एव वनम् तस्मिन् (तत्पुरुषः, कर्मधारय)।

मोहः – मुह् – घञ्। प्रणयः – प्र + नी + अच्। उपयम्य – उप + यम् + ल्यप्। दिशन्ती – दिश् + शतृ + ङीप्।

**दुर्गाऽपि सा भुवनदुर्गतिखण्डयित्री,**

**चण्डी च दुश्चरितदानवदण्डयित्री।**

**लक्ष्मीश्च सैव जगतो विभवस्वरूपा,**

**सज्ज्ञानदानमहिमा च सरस्वती सा।। 6 ।।**

**पदच्छेदः** – दुर्गा अपि सा भुवनदुर्गतिखण्डयित्री, चण्डी च दुश्चरितदानव – दण्डयित्री। लक्ष्मीः च सा एव जगतः विभवस्वरूपा, सज्ज्ञानदान – महिमा च सरस्वती सा।

**अन्वयः –** सा भुवनदुर्गतिखण्डयित्री दुर्गा अपि (विद्यते), दुश्चरितदानवदण्डयित्री च चण्डी (वर्तते)। सा एव च जगतः विभवस्वरूपा लक्ष्मीः, सज्ज्ञानदानमहिमा सरस्वती च सा (एव अस्ति)।

**व्याख्या** – सा – पूर्वोक्ता नारी। भुवनदुर्गतिखण्डयित्री – संसारदुर्दशा, विनाशकर्त्री। दुर्गा अपि – देवी अपि। (विद्यते) दुश्चरितदानवदण्डयित्री – दुराचरणदैत्यदण्डदायिनी। (च) चण्डी – प्रचण्डरूपा देवी वर्तते। सा एव च – पूर्वोक्ता नारी एव। जगतः – संसारस्य। विभवस्वरूपा – ऐश्वर्यरूपिणी। लक्ष्मीः

– श्रीः, रमा। अस्ति। सज्ज्ञानदानमहिमा – उत्तमविद्यादान – महिममयी सरस्वती – ज्ञानदायिनी देवी च सा – नारी एव अस्ति।

**भावार्थः** –नार्याः गौरवं देवीरूपेषु वर्णयति कविः यत् – सा लोकस्य दुर्दशां विनाशयति अतः दुर्गा अस्ति, तथैव दुष्टान् दैत्यान् दण्डयति तेन चण्डी अपि सा एव नारी विद्यते। जगतः ऐश्वर्यस्वरूपिणी लक्ष्मीः अपि नारी वर्तते। सा एवं उत्तमविद्यादायिनी सरस्वती अस्ति।

**व्याकरणम् –** सज्ज्ञानम् – सद् + ज्ञानम्, व्यञ्जनसन्धिः श्चुत्वम्। सैव – सा + एव, स्वरसन्धिः, वृद्धिः। खण्डयित्री – खण्डयितृ + ई (ङीप्) स्वरसन्धि : यण्। दुर्गाऽपि – दुर्गा + अपि, स्वरसन्धिः, सवर्णदीर्घः। भुवनदुर्गतिखण्डयित्री – भुवनानां दुर्गतिः भुवनदुर्गतिः तस्याः खण्डयित्री (तत्पुरुषः)। सज्ज्ञानदानमहिमा – सत् च तत् ज्ञानम् सज्ज्ञानम् तस्य दानम् सज्ज्ञानदानम् इति महिमा यस्याः सा (तत्पुरुषगर्भबहुव्रीहिः)। दुश्चरितदानवदण्डयित्री – दुष्टं चरितं येषां ते, ते च दानवाः तान् दण्डयति इति सा (बहुव्रीहिगर्भतत्पुरुषः)। दण्डयित्री – दण्ड् + तृच् + ङीप्। विभवः– वि+ भू + अप्। ज्ञानम् – ज्ञा + ल्युट्। महिमा – महत् + इमनिच्।

**कल्याणमात्रचरिताऽद्य च लोकतन्त्रे,**
**नेतृत्वमप्यनुपमं सहजं वहन्ती।**
**विज्ञानभूमिषु पुनः पदमर्पयन्ती,**
**सिद्धेव पर्यटति सा गहनेऽन्तरिक्षे।। 7 ।।**

**पदच्छेदः** – कल्याणमात्रचरिता अद्य च लोकतन्त्रे, नेतृत्वम् अपि अनुपमम् सहजम् वहन्ती। विज्ञानभूमिषु पुनः पदम् अर्पयन्ती, सिद्धा इव पर्यटति सा गहने अन्तरिक्षे।

**अन्वयः –** कल्याणमात्रचरिता च सा अद्य लोकतन्त्रे अनुपमं नेतृत्वम् अपि सहजं वहन्ती, पुनः विज्ञानभूमिषु (अपि) पदम् अर्पयन्ती, (सा) गहने अन्तरिक्षे सिद्धा एव पर्यटति।

**व्याख्या**– कल्याणमात्रचरिता – हितमात्राचरणशीला। अद्य–आधुनिककाले। लोकतन्त्रे–जनानां शासने, शासनविशेषे। अनुपमम् उत्कृष्टम्, अद्वितीयम्। नेतृत्वम् – नायकत्वम् अपि। सहजम् – स्वाभाविकरूपेण। वहन्ती – धारयन्ती। पुनरपि च। विज्ञानभूमिषु – विज्ञानक्षेत्रे अपि। पदम् – चरणम् अर्पयन्ती प्रथयन्ती, स्थापनं कुर्वती। सा–नारी। गहने – गभीरे। अन्तरिक्षे – नभोमण्डले। सिद्धा – सिद्धाङ्गना। इव – यथा। पर्यटति – भ्रमति।

**भावार्थः** – आधुनिकयुगे नार्याः चरितोत्कर्षं वर्णयति कविः यत् वर्तमानकाले लोकतन्त्रेऽस्मिन् हिताचरणशीला सा नारी नायकत्वम् उत्कृष्टरूपेण सहजतया धारयति। पुनश्च विज्ञानक्षेत्रे अपि पदस्थापनं कृत्वा विशालब्रह्माण्डे सिद्धाङ्गना इव पर्यटनं करोति।

**व्याकरणम् –** अप्यनुपमम् – अपि + अनुपमम्, स्वरसन्धिः, यण्। सिद्धेव – सिद्धा + इव, स्वरसन्धिः, गुणः। गहनेऽन्तरिक्षे – गहने + अन्तरिक्षे, स्वरसन्धिः, पूर्वरूपम्। पर्यटति – परि + अटति, स्वरसन्धिः, यण्।

कल्याणमात्रचरिता – कल्याणम् एव चरितम् यस्याः सा कल्याणमात्रचरिता (बहुव्रीहिः)। लोकतन्त्रे – लोकस्य तन्त्रम् तस्मिन् (षष्ठीतत्पुरुषः)। विज्ञानभूमिषु – विज्ञानस्य भूमिः तासु (षष्ठीतत्पुरुषः) नेतृत्वम् – नेतृ + त्व। वहन्ती – वह् + शतृ + ङीप्। सिद्धा – सिध् + क्त + टाप्।

**नारीं स्वभावमृदुलामबलां वदन्तः,**
**जानन्ति नात्मबलगौरवमेव तस्याः।**
**नो चेन्महामहिमदुर्धरशक्तिमन्तः,**
**जन्माऽलभन्त किमु वा पुरुषस्य गर्भे।। ८ ।।**

**पदच्छेदः** – नारीम् स्वभावमृदुलाम् अबलाम् वदन्तः, जानन्ति न आत्मबलगौरवम् एव तस्याः। नो चेत् महामहिम दुर्धर शक्तिमन्तः, जन्म अलभन्त किमु वा पुरुषस्य गर्भे।

अन्वयः – स्वभावमृदुलां नारीम् अबलां वदन्तः (जनाः) तस्याः आत्मबलगौरवम् एव न जानन्ति। नो चेत् महामहिम दुर्धरशक्तिमन्तः (वीराः) किमु वा पुरुषस्य गर्भे जन्म अलभन्त?

**व्याख्या** – स्वभावमृदुलाम् – कोमलस्वभावाम्, निसर्गकोमलाम्। नारीम् – स्त्रियम्। अबलां वदन्तः – 'अबला' इति पदेन कथयन्तः नास्ति बलं यस्याः सा अबला इत्यनेन बलहीना, निर्बला वा अर्थः प्राप्यते। यद्यपि अबलापदं नारीपर्यायवाचकम् एव प्रयुज्यते तथापि अत्र व्यङ्ग्यवचनं विधीयते यत् नारीकृते 'अबला' इति पदप्रयोगं कुर्वन्तः जनाः। तस्याः – नार्याः। आत्मबलगौरवम् –आत्मशक्तिमहिमानम्। एव – नूनम्। न जानन्ति – न विदन्ति, न अवगच्छन्ति। नो चेत् – अन्यथा। महामहिमदुर्धरशक्तिमन्तः – अतिशयदुर्दम्यपराक्रमशालिनः वीराः। किमु वा – किं वा। पुरुषस्य – नरस्य। गर्भे – गर्भाशये, उदरे वा। जन्म – जननम्। अलभन्त – प्राप्तवन्तः।

**भावार्थः** – अत्र नार्याः आत्मबलं वर्णयति कविः – ये जनाः कोमलस्वभावां नारीम् अबलापदेन वदन्ति ते तासाम् आत्मबलगौरवं न जानन्ति। अतिशयपराक्रमशालिनः वीराः नारीणां गर्भेषु एव जन्म अलभन्त, न च पुरुषगर्भेषु।

**व्याकरणम् –** चेन्महामहिम – चेत् + महामहिम, व्यञ्जनसन्धिः, अनुनासिकः। जन्मालभन्त– जन्म + अलभन्त, स्वरसन्धिः, सवर्णदीर्घः।

स्वभावमृदुलाम् – स्वभावेन मृदुला ताम् (तृतीया–तत्पुरुषः)। आत्मबलगौरवम् – आत्मनः बलम् इति आत्मबलम् तस्य गौरवम् (षष्ठीतत्पुरुषः)। महामहिमदुर्धरशक्तिमन्तः – महाँश्चासौ महिमा इति महामहिमा दुर्धरा च असौ शक्तिः दुर्धरशक्तिः, महामहिमा दुर्धरशक्तिः च येषां ते तादृशाः (मतुप्) बहुव्रीहिः। वदन्तः – वद् + शतृ प्रथमा बहुवचनम्। शक्तिमन्तः शक्ति + मतुप् प्रथमाबहुवचनम्।

**तामद्य बुद्धिरहिताः प्रतिरुद्धपुण्याः,**
**निघ्नन्ति गर्भनिहितामपि ये कृतघ्नाः।**
**तेऽमी स्वयं स्वचरणानि कुठारघातैः,**
**उच्छेदयन्ति महिषासुरवंशजन्याः।। ९ ।।**

**पदच्छेदः** – ताम् अद्य बुद्धिरहिताः प्रतिरुद्धपुण्याः, निघ्नन्ति गर्भनिहिताम् अपि ये कृतघ्नाः। ते अमी स्वयम् स्वचरणानि कुठारघातैः उच्छेदयन्ति महिषासुरवंशजन्याः।

**अन्वयः –** अद्य तां गर्भनिहिताम् अपि ये बुद्धिरहिताः, प्रतिरुद्धपुण्याः, कृतघ्नाः (जनाः) निघ्नन्ति। ते अमी महिषासुरवंशजन्याः कुठारघातैः स्वचरणानि स्वयम् उच्छेदयन्ति।

**व्याख्या** – अद्य – आधुनिककाले। ताम् – नारीम्। गर्भनिहितामपि – गर्भे स्थितामपि। ये–जनाः। बुद्धिरहिताः – मतिहीनाः। प्रतिरुद्धपुण्याः – भाग्यहीनाः। कृतघ्नाः – अकृतज्ञाः। निघ्नन्ति – मारयन्ति, गर्भपातं कुर्वन्ति इत्यर्थः। ते अमी – तादृशाः एते जनाः। महिषासुरवंशजन्याः – महिषासुरकुलोत्पन्नाः, (महिषासुरो नाम दानवराजः पुरा दुर्गां युद्धे मारयितुं तत्परः, स्वयं हतः इति पौराणिकी कथा)। कुठारघातैः –परशुप्रहारैः। स्वचरणानि–स्वपदानि। स्वयम्–आत्मना एव। उच्छेदयन्ति–विखण्डयन्ति, लुनन्ति।

**भावार्थः** – कन्याभ्रूणहत्यां निन्दति कविः यत् ये जनाः कन्यां जन्मनः प्रागेव मारयन्ति ते बुद्धिरहिताः, हीनभाग्याः अकृतज्ञाः च भवन्ति। ते महिषासुरस्य कुले उत्पन्नाः ये परशुप्रहारैः स्वयं स्वपदानि विखण्डयन्ति। यथा महिषासुरः युद्धे दुर्गां घातयितुं तत्परः, किन्तु स्वयमेव हतः।

**व्याकरणम्** – तेऽमी – ते–अमी, स्वरसन्धिः पूर्वरूपम्। उच्छेदयन्ति – उद् + छेदयन्ति, व्यञ्जनसन्धिः, श्चुत्व – चर्त्वम्। स्वचरणानि – स्वस्य चरणानि, (षष्ठीतत्पुरुषः)। प्रतिरुद्धपुण्याः – प्रतिरुद्धं पुण्यं येषां ते प्रतिरुद्धपुण्याः (बहुव्रीहिः)। कुठारघातैः – कुठारेण घातः तैः (तृतीयातत्पुरुषः)।

गर्भनिहिताम् – गर्भे निहिताम् (सप्तमीतत्पुरुषः)। जन्याः–जन + यत् (प्रथमाबहुवचनम्)। बुद्धि – बुध् + क्तिन्। घातः–हन् + घञ्। निहिताम् – नि + धा + क्त + टाप् (अम्)।

**नार्यस्तु यत्र हृदयेन समाद्रियन्ते,**
**तस्मिन् गृहे प्रमुदिता निवसन्ति देवाः।**
**स्वर्गोपमं भवति देवमयं गृहं तद्,**
**राष्ट्रं च तैस्त्रिभुवनश्रियमुद्बिभर्ति।। 10 ।।**

**पदच्छेदः** – नार्यः तु यत्र हृदयेन समाद्रियन्ते, तस्मिन् गृहे प्रमुदिता निवसन्ति देवाः। स्वर्गोपमम् भवति देवमयम् गृहम् तद्, राष्ट्रम् च तैः त्रिभुवनश्रियम् उद्बिभर्ति।

**अन्वयः** – यत्र तु नार्यः हृदयेन समाद्रियन्ते, तस्मिन् गृहे प्रमुदिताः देवाः निवसन्ति। देवमयं तद् गृहं (च) स्वर्गोपमं भवति, तैः (गृहैः) च राष्ट्रं त्रिभुवनश्रियम् उद्बिभर्ति।

**व्याख्या** – यत्र तु – यस्मिन् स्थाने गृहे वा। नार्यः – स्त्रियः। हृदयेन – अन्तःकरणेन, मनसा। समाद्रियन्ते – सम्यक् आदृताः भवन्ति। तस्मिन् गृहे – तादृशे भवने। प्रमुदिताः – प्रसन्नाः। देवाः – सुराः। निवसन्ति – विराजन्ते। देवमयम् – देवयुक्तम्। तद्गृहम् – तादृशं भवनम्। स्वर्गोपमम् – स्वर्गतुल्यम्। भवति – जायते। तैः च – पूर्वोक्तैः गृहैः। राष्ट्रम् – देशः। त्रिभुवनश्रियम् – लोकत्रयलक्ष्मीम्। उद्बिभर्ति – उद्वहति, अधिगच्छति।

**भावार्थः** – नारीणां समादरजन्यां कल्याणपरम्परां निरूपयति कविः यत्– यस्मिन् गृहे नारीणां समादरः भवति, तस्मिन् गृहे देवाः निवासं कुर्वन्ति। **'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः'** इति अयं भावः अत्र विलसति। देवयुक्तं गृहं स्वर्गतुल्यं भवति। स्वर्गतुल्यैः गृहैः राष्ट्रं महासमृद्धिभिः सम्पन्नं भवति। अतः नारीं प्रति सदैव समादरः ज्ञापनीयः।

**व्याकरणम्** – नार्यस्तु – नार्यः + तु, विसर्गसन्धिः, सत्वम्। स्वर्गोपमम्, स्वर्ग – उपमम्, स्वरसन्धिः, गुणसन्धिः। तैस्त्रिभुवनश्रियम् – तैः + त्रिभुवनश्रियम्, विसर्गसन्धिः, सत्वम्।

स्वर्गोपमम् – स्वर्गः उपमा यस्य तत् स्वर्गोपमम् (बहुव्रीहिः)। त्रिभुवनश्रियम् – त्रयाणां भुवनानां

समाहारः त्रिभुवनम् त्रिभुवनस्य श्रीः ताम् (द्विगुगर्भषष्ठीतत्पुरुषः)।

प्रमुदिताः – प्र + मुद् + क्त + टाप्। देवमयम् – देव + मयट्।

## अभ्यासप्रश्नाः

### बहुविकल्पात्मकप्रश्नाः –

### निर्देशः – उचितं सङ्केताक्षरं कोष्ठके लेख्यम् –

1. नारी जन्मप्रदा अतः सा उच्यते –
   (क) पुत्री (ख) भगिनी
   (ग) जननी (घ) पत्नी
2. उत्साहपुण्यतटिनी अस्ति –
   (क) मातृशक्तिः (ख) पितृशक्तिः
   (ग) भ्रातृशक्तिः (घ) जनशक्तिः
3. जनस्य सुकृतैः नारी भवति –
   (क) भगिनी (ख) पत्नी
   (ग) माता (घ) पुत्री
4. नारी कैः वंशं समुज्ज्वलयते –
   (क) प्रणयावलोकैः (ख) हस्तेन हस्तमुपयम्य
   (ग) श्रेष्ठकार्यैः (घ) सदपत्यरत्नैः
5. मातृशक्तिः आशिषा निवारयति –
   (क) सुखानि (ख) रोगान्
   (ग) दोषान् (घ) दुरितानि
6. कल्याणमात्रचरिता नारी अन्तरिक्षे कथं पर्यटति –
   (क) शोभा इव (ख) सिद्धा इव
   (ग) धरा इव (घ) प्रभा इव
7. देवमयं तद् गृहं कीदृशं भवति –
   (क) स्वर्गोपमम् (ख) नरकोपमम्
   (ग) पर्वतोपमम् (घ) गृद्धोपमम्
8. महिषासुरवंशजन्याः के ?
   (क) ये बालान् निघ्नन्ति (ख) ये कन्याभ्रूणं निघ्नन्ति

(ग) ये पशून् निघ्नन्ति (घ) सर्वे

9. यत्र नार्यस्तु पूज्यन्ते तत्र के रमन्ते ?

(क) जनाः (ख) जन्तवः

(ग) देवताः (घ) दैत्याः

10. सज्ज्ञान–दानमहिमा नारी केन नाम्ना वर्णिता ?

(क) सरस्वती (ख) दुर्गा

(ग) लक्ष्मीः (घ) चण्डी

## अतिलघूत्तरात्मकप्रश्नाः

### निर्देश : एकवाक्येन प्रत्येकम् उत्तरं लिखत –

1. सहोदरत्वात् नारी केन नाम्ना ज्ञायते ?
2. नारीं विना विधाता कीदृशो भवेत् ?
3. मातृशक्तिः कीदृशं कर्तव्यमार्गं दिशति ?
4. "तात ! श्रान्तोऽसि मदङ्के शिरो विनिधेहि" इति का कस्मै कथयति ?
5. नारी (भगिनीरूपा) रक्षानिबन्धनेन जनस्य हृदये किं सृजति ?
6. 'दिशन्ती' इत्यत्र कः धातुः कश्च प्रत्ययः ?
7. 'तेऽमी' इत्यस्य कः सन्धिविच्छेदः ?
8. 'उचिताऽनुचितम्' अत्र कः समासः ?
9. कीदृशी नारी अनुपमं नेतृत्वं सहजं वहति ?
10. देवाः कस्मिन् गृहे प्रमुदिताः निवसन्ति ?

## लघूत्तरात्मक–प्रश्नाः

### निर्देशः – पङ्क्तिचतुष्टयेन प्रतिप्रश्नम् उत्तरं देयम् –

1. मातृशक्तिः उत्साहपुण्यतटिनी कथम् अस्ति ?
2. 'श्रान्तोऽसि तात !.........' इति पद्यस्य आशयं वर्णयत।
3. नारी इह जगति सौभाग्यसिन्धुसरिद् अस्ति। कथम् ?
4. आधुनिकयुगे नार्याः चरितोत्कर्षं वर्णयत।
5. नार्याः दुर्गादिपौराणिकस्वरूपाणां गौरवं वर्णयत।
6. यत्र नार्यः समाद्रियन्ते तद् गृहं कीदृशं भवति ?

### निबन्धात्मकाः प्रश्नाः –

### निर्देशः – दशसु वाक्येषु प्रत्येकम् उत्तरं लिखत –

1. नारीमहिमा पाठस्य सारः लेख्यः।
2. प्रस्तुतपाठस्य प्रणेतुः परिचयं लिखत।
3. राष्ट्रं त्रिभुवनश्रियं कदा धारयति ?
4. भगिनीरूपे पत्नीरूपे च नार्याः चरितं वर्णयत।